CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

॥श्रीगणेशाय नमः॥ ॥अथ गोमुखप्रसवप्रयोगः॥ शुभदिने अभ्यंगस्नानादिना कृतस्सभार्यः रुत्वो
१ थो अस्य बालकस्य अमुकदुष्टकालोत्पत्तिसूचितारिष्टनिवृत्तिद्वारा श्रीप॰र्थं गोमुखप्रसवाख्यां शांतिं
करिष्ये· तदंगत्वेन गणेशपूजनं आचार्यवरणं च करिष्ये॥ ततः आचार्यः यदत्र संस्थितमिति सर्ष
पविकिरणं· शुचीवो· पंचगव्येन· आपोहिष्ठा· अद्भिश्च देशप्रोक्षणं॥ स्वस्त्ययनं तार्क्ष्यमिति॥ गृहस्यै
शान भागे गोमयेनोपलिप्य श्वेतरजोभिः कर्णिकायुक्तं पंकजं कृत्वा तत्र व्रीहीन्निक्षिप्य तेषु शूर्पं त
स्मिन्नूतनवस्त्रं प्रसारितं तत्र तिलविकिरणं च कृत्वा तत्र प्राङ्मुखं शिशुं निधाय सशिशु शूर्पं सूत्रेण प
वेष्टयित्वा तस्मिन् गोमुखसान्निध्यं कृत्वा॥ विष्णुर्योनिमिति सूक्तेन जन्मचिंतनं कृत्वा तेनैवावृत्त्या पं
चगव्येन शिशुं स्नापयित्वा॥ गवामंगेषु तिष्ठंति भुवनानि चतुर्दश॥ यस्मात्तस्माच्छिवं मेस्यादिह लो
के परत्र चेति गोः सर्वांगेषु वामांगे चैव वा स्पर्शेत्॥ ततः आचार्यः बालमादाय गोमुखसमीपे बालं
नीत्वा पुनरादाय पित्रे दद्यात् ततः आचार्यः पितृहस्तेन मात्रे दापयेत्॥ नवेनवस्त्रे शिशुं स्थाप्य आच्छादन १
मपसार्य पुत्रमुखेक्षणं कुर्यात्· ततः पंचगव्येनाचार्यः शिशुं प्रोक्षेत्· आपोहिष्ठेति तिसृभिः अभि

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पूषाश्विनौ गुरौ सार्पमघा चित्रेंद्रमूलभौ एषु ऋक्षेषु जातस्य कुर्याद्धोजननं तथा। जन्मर्क्षे वा त्रिजन्मर्क्षे शुभवारे
शुभे दिने। कृत्वाभ्यंगादिकं सर्वं गृहालंकारपूर्वकं॥

॥ गोमुखप्रसवशांतिप्रयोगः ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यमायत्स्तोमभिरिति यजं। दूर्वाभिः परमान्नैर्द्रव्यैः। सहस्रं वा तदर्धं वा मत्वं जयमिति तिलैः।३१॥
दूर्वाभिश्चायुक्तं। तदर्धं वा सहस्रं वा अश्वत्थामादीन्सप्त देवताः॥ कलशेषु आवाह्य। वेदपाराय
णस्सूक्तं। पुरुषसूक्तं। अश्वत्थप्रदक्षिणं। रुद्राभिषेकं। आहोमात्। होमसमापनानंतरं पूर्णा
हुतिं हुत्वा। कलशदेवतां उत्तरपूजां कृत्वा। कलशदानादि कृत्वा। नवग्रहपीठदानं। दशदानानि॰ आ
ज्यावेक्षणं दद्यात्। कन्यादानं। उभयतोमुखीं। ब्रह्मप्रतिष्ठायतनदानस्य पर्तिदानं कुर्यात्। आचा
र्यादीन्दक्षिणां दत्वा। नववस्त्रं धारयित्वा। कुंकुमचंदनं धारयित्वा। नीराजनं कारयित्वा।
ब्राह्मणो राशिबोगं हित्वा। ब्राह्मणान्मिष्टान्नेन सहस्रं शतं वा भोजयित्वा। तैः राशिबोगं हि
त्वा। बंधुभिः सह भुंजीत। इति शौनकोक्तउग्ररथशांतिः। षष्टिवर्षादिप्रयुक्तारिष्टशांतिः॥
इदं पुस्तकं कुंटोपनामक गंगारामभट्टस्य॥ सं॰ १८७७ मिती अधिक ज्येष्ठ शुद्ध ५ बुधे॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीसूक्तं रुद्रजाप्यं च आयुः पुरुषसूक्तकं ॥२०॥ वेदादिपठनं चैव कर्तव्यं च विशेषतः।
होमशेषं समाप्याथ पूर्णाहुतिमतः परं ॥२१॥ कलशाभिषेकं कुर्वीत पुत्रदारादिसं
युतः। शांतिसूक्तं पुरुषसूक्तं परं मत्वोक्तमेव च ॥२२॥ आयुष्यं पवमानं च रुद्रसूक्तं कल्पमेव च।
महाशांतिं प्रजप्याथ कलशं अप्रदापयेत् ॥२३॥ अभिषेकात्पूर्तं वस्त्रं आचार्याय निवेदयेत्।
सालंकारं सवत्सां गां मार्कण्डेय निवेदयेत् ॥२४॥ दशदानानि विप्रेभ्यः शतमानं सुवर्णकं। जन्मा
हेमन्नं भाजने अन्यस्मिन् शुभवादिने ॥२५॥ मंगलस्नानं तं कृत्वा ब्राह्मणानभिमंत्र्य ता। पुण्याह
वाचनं कृत्वा नांदीश्राद्धं तु कल्पयेत ॥२६॥ आचार्यं वरयित्वा तु अन्वाधानं च कारयेत्। पंचगव्यं प्रा
शयित्वा नवग्रहांस्तु पूजयेत ॥२७॥ प्रत्येकं कलशसंख्या वा अष्टोत्तरसंख्यया। त्रिसहस्रं सहस्रं
वा समिधाज्यचरूंस्तथा ॥२८॥ दूर्वाभिः परमान्नं च मार्कण्डेयप्रधानकं। अयुतं वा तदर्धं वा
सहस्रं वा तदर्धकं ॥२९॥ समिदाज्यचरुद्रव्यैः संख्यायामधिदेवता। मृत्युंजय प्रत्यधिदेवता
वर्षं। मार्कंडेयमंत्रस्तु। मार्कंडेय महाभाग सप्तकल्पांतजीविनः। आयुरारोग्यमैश्वर्यं आयुष्यं तो
प्रयच्छतु ॥३०॥ इति मंत्रेण मार्कंडेयं। त्र्यंबकं इति मंत्रेण त्र्यंबकं।

Kashi Maharani Collection, Ramnagar Fort, Varanasi